# १४ चतुर्दश दशकः - सुदर्शन कथा – भरद्वाजाश्रम प्रवेशम्

राजा पुराऽऽसीत्किल कोसलेषु धर्मैक निष्ठो ध्रुवसन्धि नामा ।
आस्तां प्रिये अस्य मनोरमा च लीलावती चेति दृढानुरक्ते ॥ १४-१॥

मनोरमाऽसूत सुदर्शनाख्यं कुमारकं शत्रुजितं च साऽन्या ।
संवर्धयंस्तौ मृगया विहारी वने नृपो हा हरिणा हतोऽभूत् ॥ १४-२॥

विचिन्तयन् राजकुलस्य वृत्तं तज्ज्येष्ठ पुत्रस्य सुदर्शनस्य ।
राज्याभिषेकाय गुरु र्वसिष्ठः चकार मन्त्रं सचिवैः समेतः ॥ १४-३॥

मातामहः शत्रुजितो युधाजित् अभ्येत्य सद्योऽमित वीर्यशाली ।
राज्ये स्वदौहित्र मिहाभिषिक्तं कर्तुं कुबुद्धिः कुरुते स्म यत्नम् ॥ १४-४॥

मनोरमाया अपि वीरसेनः पिताऽभ्युपेत्याशु रुरोध तस्य ।
यत्नं बली स्वस्व सुतासुताभि-षेकैक बुद्धी खलु तावभूताम् ॥ १४-५॥

कृत्वा विवादं च ततो नृपौ द्वौ घोरं रणं चक्रतुरिद्ध रोषौ ।
युधाजिता तत्र तु वीरसेनो दैवाद्धतोऽभूद्धरिणा करीव ॥ १४-६॥

राज्येऽभिषिक्तः खलु शत्रुजित्स बालस्ततोऽयं रिपुभि द्युधाजित् ।
दौहित्र राज्यं सुख मेकनाथः शशास वज्रीव दिवं महेशि ॥ १४-७॥

पत्युः पितुश्चापि मृते रनाथा भीता विदल्लाभिध मन्त्रियुक्ता ।
मनोरमा बालसुता त्वरण्ये ययौ भरद्वाज मुनिं शरण्यम् ॥ १४-८॥

तपोनिधिर्दीन जनानुकम्पी ज्ञात्वा मुनिस्तां ध्रुवसन्धि पत्नीम् ।
उवाच- वत्से वस निर्भयैव तपोवनेऽत्रास्तु शुभं तवेति ॥ १४-९॥

अल्पोऽप्युपेक्ष्यो न रिपुर्न रोगोऽपि एवं स्मरन्नाशु नृपो युधाजित् ।
तां हर्तुकामः ससुतां महर्षेः प्रापाश्रमं मन्त्रिवरेण साकम् ॥ १४-१०॥

न मानितस्तेन तपस्विना स मनोरमां नैव सुतं च लेभे ।
प्रहर्तुकामोऽपि मुनिं स मन्त्रिवाचा निवृत्तः श्रुतकौशिकोऽभूत् ॥ १४-११॥

एवं मुनिस्तां ससुतां ररक्ष भीतोऽस्मि संसार युधाजितोऽहम् ।
न मे सहायोऽस्ति विना त्वयैष सनूपुरं ते चरणं नमामि ॥ १४-१२॥